# Shri Krishna stotra by Vasudeva

# શ્રીકૃષ્ણસ્તોત્રં વસુદેવકૃતં બ્રહ્મવૈવર્તપુરાણાન્તર્ગતમ્

## Document Information

Text title : vasudevakRRita shrIkRRiShNastotra brahmavaivartapurANe

File name : vasudevakRRitakRRiShNastotraBVP.itx

Category : vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Transliterated by : Singanallur Ganesan singanallur at gmail.com, PSA Easwaran

Proofread by : Singanallur Ganesan singanallur at gmail.com, PSA Easwaran

Description-comments : brahmavaivartapurANa

Latest update : April 5, 2013

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શ્રીકૃષ્ણસ્તોત્રં વસુદેવકૃતં બ્રહ્મવૈવર્તપુરાણાન્તર્ગતમ્

શ્રી ગણેશાય નમઃ ।
વસુદેવ ઉવાચ –
ત્વામતીન્દ્રિયમવ્યક્તમક્ષરં નિર્ગુણં વિભુમ્ ।
ધ્યાનાસાધ્યં ચ સર્વેષાં પરમાત્માનમીશ્વરમ્ ॥ ૧॥

સ્વેચ્છામયં સર્વરૂપં સ્વેચ્છારૂપધરં પરમ્ ।
નિર્લિપ્તં પરમં બ્રહ્મ બીજરૂપં સનાતનમ્ ॥ ૨॥

સ્થૂલાત્સ્થૂલતરં પ્રાપ્તમતિસૂક્ષ્મમદર્શનમ્ ।
સ્થિતં સર્વશરીરેષુ સાક્ષિરૂપમદૃશ્યકમ્ ॥ ૩॥

શરીરવન્તં સગુણમશરીરં ગુણોત્કરં ।
પ્રકૃતિં પ્રકૃતીશં ચ પ્રાકૃતં પ્રકૃતેઃ પરમ્ ॥ ૪॥

સર્વેશં સર્વરૂપં ચ સર્વાન્તકરમવ્યયમ્ ।
સર્વાધારં નિરાધારં નિર્વ્યૂહં સ્તૌમિ કિં વિભુમ્ ॥ ૫॥

અનન્તઃ સ્તવનેઽશક્તોઽશક્તા દેવી સરસ્વતી ।
યં વા સ્તોતુમશક્તશ્ચ પઞ્ચવક્ત્રઃ ષડાનનઃ ॥ ૬॥

ચતુર્મુખો વેદકર્તા યં સ્તોતુમક્ષમઃ સદા ।
ગણેશો ન સમર્થશ્ચ યોગીન્દ્રાણાં ગુરોર્ગુરુઃ ॥ ૭॥

ઋષયો દેવતાશ્ચૈવ મુનીન્દ્રમનુમાનવાઃ ।
સ્વપ્ને તેષામદૃશ્યં ચ ત્વામેવં કિં સ્તુવન્તિ તે ॥ ૮॥

શ્રુતયઃ સ્તવનેઽશક્તાઃ કિં સ્તુવન્તિ વિપશ્ચિતઃ ।
વિહાયૈવં શરીરં ચ બાલો ભવિતુમર્હસિ ॥ ૯॥

વસુદેવકૃતં સ્તોત્રં ત્રિસન્ધ્યં યઃ પઠેન્નરઃ ।
ભક્તિં દાસ્યમવાપ્નોતિ શ્રીકૃષ્ણચરણામ્બુજે ॥ ૧૦॥

વિશિષ્ટં પુત્રં લભતે હરિદાસં ગુણાન્વિતમ્ ।
સઙ્કટં નિસ્તરેત્તૂર્ણં શત્રુભીતેઃ પ્રમુચ્યતે ॥ ૧૧॥

॥ ઇતિ શ્રી બ્રહ્મવૈવર્તમહાપુરાણે વસુદેવકૃતં
શ્રીકૃષ્ણસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by
Singanallur Ganesan singanallur at gmail.com

---

*Shri Krishna stotra by Vasudeva*
pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*